# .. kakArAdi shrI kUrmAShTottarashatanAmastotram ..

# ॥ ककारादि श्रीकूर्माष्टोत्तरशतनामस्तोत्रम् ॥

## Document Information

Text title : kakArAdi kUrmAShTottarashatanAmastotram
File name : kakArAdikUrma108nAmastotram.itx
Category : aShTottarashatanAma
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ककारादि श्रीकूर्माष्टोत्तरशतनामस्तोत्रम् ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

कमठः कन्धिमध्यस्थः करुणावरुणालयः ।
कुलाचलसमुद्धर्ता कुण्डलीन्द्रसमाश्रयः ॥ १॥

कठोरपृष्टः कुधरः कलुषीकृतसागरः ।
कल्याणमूर्तिः क्रतुभुक्प्रार्थनाधृत विग्रहः ॥ २॥

कुलाचलसमुद्भ्रान्तिघृष्टकण्डूतिसौख्यवान् ।
करालश्वाससङ्क्षुब्धसिन्धूर्मिप्रहताम्बरः ॥ ३॥

कन्धिकर्दमकस्तूरीलिप्तवक्षःस्थलः कृती ।
कुलीरादिपयस्सत्त्वनिष्पेषणचतुष्पदः ॥ ४॥

कराग्रादत्तसम्भुक्ततिमिङ्गिलगिलोत्करः ।
कन्धिपुष्पद्विरेफाभः कपर्द्यादिसमीडितः ॥ ५॥

कल्याणाचलतुङ्गात्मागाधीकृतपयोनिधिः ।
कुलिशत्पृष्ठसङ्घर्षक्षीणमूलकुलाचलः ॥ ६॥

काश्यपीसत्कुचप्रायमन्दराहतपृष्ठकः ।
कायैकदेशापर्याप्तशेषदिग्गजमण्डलः ॥ ७॥

कठोरचरणाघातद्वैधीकृतपयोनिधिः ।
कालकूटकृतत्रासः काण्डदुर्मितवैभवः ॥ ८॥

कमनीयः कविस्तुत्यः कनिधिः कमलापतिः ।
कमलासनकल्याणसन्धाता कलिनाशनः ॥ ९॥

कटाक्षक्षतदेवार्तिः केन्द्रादिविधृतांजलिः ।
कालीपतिप्रीतिपात्रं कामितार्थप्रदः कविः ॥ १०॥

कूटस्थः कूटकमठः कूटयोगिसुदुर्लभः ।
कामहीनः कामहेतुः कामभृत्कंजलोचनः ॥ ११॥

क्रतुभुग्दैन्यविध्वंसी क्रतुभुक्पालकः क्रतुः ।
क्रतुपूज्यः क्रतुनिधिः क्रतुत्राता क्रतूद्भवः ॥ १२॥

कैवल्यसौख्यदकथः कैशोरोत्क्षिप्तमन्दरः ।
कैवल्यनिर्वाणमयः कैटभप्रतिसूदनः ॥ १३॥

क्रान्तसर्वाम्बुधिः क्रान्तपातालः कोमलोदरः ।
कन्धिसोर्मिजलक्षौमः कुलाचलकचोत्करः ॥ १४॥

कटुनिश्श्वासनिर्धूतरक्षस्तूलः कृताद्भुतः ।
कौमोदकीहतामित्रः कौतुकाकविताहवः ॥ १५॥

करालिकंटकोद्धर्ता कविताब्धिमणीसुमः ।
कैवल्यवल्लरीकन्दः कन्दुकीकृतचन्दिरः ॥ १६॥

करपीतसमस्ताब्धिः कायान्तर्गतवाश्वरः ।
कर्पराब्जद्विरेफाभमन्दरः कन्दलत्स्मितः ॥ १७॥

काश्यपीव्रततीकन्दः कश्यपादिसमानतः ।
कल्याणजालनिलयः क्रतुभुङ्नेत्रनन्दनः ॥ १८॥

कबन्धचरहर्यक्षः क्रान्तदर्शिमनोहरः ।
कर्मठाविषयः कर्मकर्तृभावादिवर्जितः ॥ १९॥

कर्मानधीनः कर्मज्ञः कर्मपः कर्मचोदनः ।
कर्मसाक्षी कर्महेतुः कर्मज्ञानविभागकृत् ॥ २०॥

कर्ता कारयिता कार्यं कारणं करणं कृतिः ।
कृत्स्नं कृत्स्नातिगः कृत्स्नचेतनः कृत्स्नमोहनः ॥ २१॥

करणागोचरः कालः कार्यकारणतातिगः ।
कालावशः कालपाशबद्धभक्तावनाभिधः ॥ २२॥

कृतकृत्यः केलिफलः कीर्तनीयः कृतोत्सवः ।
कृतेतरमहानन्दः कृतज्ञः कृतसत्सुखः ॥ २३॥

॥ इति ककारादि श्री कमठावताराष्टोत्तरशतम् रामेण पराभव
वैशाख बहुलद्वादश्यां लिखितम् श्री हयग्रीवायार्पितम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. kakArAdi shrI kUrmAShTottarashatanAmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*